[६२३] समशब्दादावतुप्रत्ययो [1]वक्तव्यः ।

'[2]समावद् वसति' (मै. सं. २.२.७.७) ।

[६२४] [3]नवस्य नू आदेश[4]स्त्नप्तनप्खाश्च प्रत्ययाः ।

नूत्नम्, नूतनम्, नवीनम् ।

[६२५] नश्च पुराणे प्रात् ।

पुराणे वर्तमानात् प्रशब्दान् नप्रत्ययो भवति । चकारान् नप्त्नप्खाश्च[5] । प्रणम्, प्रत्नम्, (ऋ. १.३६.४), प्रतनम्, प्रीणम् ।

[६२६] भागरूपनामभ्यो धेयः प्रत्ययो वक्तव्यः ।

भागधेयम् । रूपधेयम् । नामधेयम् ।

[६२७] मित्राच्छन्दसि ।

'मित्रधेये यतस्व' (तै. सं. ४.१.७.२) ।

[६२८] [6]आग्नीध्रसाधारणादञ्[7] ।

'आग्नीध्रम्' (तै. सं. ३.१.६.१) । 'साधारणम्' (तै. सं. २.६.१.६) । स्त्रियां ङीप् – आग्नीध्री 'साधारणी' (ऋ. १.१६०.४) ।

वाप्रकरणाच्च [8]विकल्पन्ते एतान्युपसंख्यानानि, तेन यथाप्राप्तमपि भवति, आग्नीध्रा शाला, [9]साधारणा भूः इति ।

[६२९] [10]अयवसमरुद्भ्यां छन्दस्यञ् वक्तव्यः ।

'आयवसे रमन्ते' (तै. सं. ५.२.८.३) । 'मारुतं [11]शर्धः' (ऋ. १.१०६.१) ॥

## अतिथे[12]र्ञ्यः । (२६/२००४)

तादर्थ्ये इत्येव । अतिथिशब्दात् चतुर्थीसमर्थात् तादर्थ्ये अभिधेये [13]ञ्यः प्रत्ययो भवति । अतिथये इदम् आतिथ्यम् ॥

## देवात्तल् । (२७/२००५)

तादर्थ्ये इति निवृत्तम् । देवशब्दात् स्वार्थे तल्प्रत्ययो भवति । देव [14]एव देवता ॥

---

1. भवति ग. 2. समावद्धसतु मुद्रितः पाठः 3. नवशब्दस्य क. फ. 4. भवति इत्यधिकम् क. 5. प्रत्ययाः वक्तव्याः इत्यधिकम् ग. 6. अग्नीध्र ङ. 7. वक्तव्यः इत्यधिकम् क. 8. विकल्प्यन्ते ह. 9. साधारणी ग. क. 10. अयवस् ह. 11. शतम् ह, अयवसं मारुतं वसनम् क, आयवसः सामः ब. 12-13. ण्यः ङ. 14. एव नास्ति क.